# PT4/ANNUAL EXAMINATION, 2023-24

## SANSKRIT

**Time – 3 hrs.** | **Class – IX** | **M.M. – 80**

*Name of the student ______________________ Section ____ Date - 19.02.2024 (Monday)*

**निर्देशाः -**

(i) प्रश्नपत्रे चत्वारः खण्डाः सन्ति ।
- खण्डः (क) अपठित-अवबोधनम् - 10 **अङ्काः**
- खण्डः (ख)रचनात्मक- कार्य - **15 अङ्काः**
- खण्डः (ग) अनुप्रयुक्त-व्याकरणम् - **25 अङ्काः**
- खण्डः (घ) पठित- अवबोधनम् - **30 अङ्काः**

(ii) सर्वे प्रश्नाः अनिवार्याः सन्ति ।

(iii) प्रश्नानाम् उत्तराणि खण्डक्रमानुसारं क्रमेणैव लेखनीयानि ।

(iv) उत्तराणि संस्कृतेनैव लेखनीयानि ।

(v) प्रश्नसंख्या अवश्यमेव लेखनीया ।

### खण्डः - क (अपठितावबोधनम् - 10 अङ्काः)

**प्र.1 अधोलिखितं अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत -**

एकदा सर्वे पक्षिणः मिलित्वा उलूकं स्वाधिपतिं विधातुं विचारितवन्तः। तस्य अभिषेकवेलापि तैः निश्चिता। ततो यदा अभिषेकोत्सवः प्रारब्धः तदैव कश्चित् वायसः तत्रागच्छत्। उलूकस्याभिषेक-समाचारं श्रुत्वा सोऽवदत् -"भोः! किं विचार्य भवद्भिः एषः दिवान्धः उलूकः राजपदे प्रतिष्ठापयितुं निश्चितः ? यस्य देशस्य राजा एवम् अन्धो भविष्यति तस्य प्रजा अपि तथैव भविष्यति । किं न श्रुतं भवद्भिः - "यथा राजा तथा प्रजा इति ।" ततः सर्वेऽपि तस्य परामर्शं मत्वा यत्र तत्र प्रस्थिताः । कथैषा पुरातनी परम् अस्याः तात्पर्यं तु अद्यापि अक्षरशः सत्यम्। लोकतान्त्रिकदेशेषु यथा राष्ट्रप्रमुखः सर्वकारो वा तथा तस्य देशस्य स्थितिः भवति। अतः राजपदे योग्यजनः एव प्रतिष्ठापयितव्यः । सम्प्रति यथा नेतारः तथा जनाः।

**I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** (1x2=2)

(i) पक्षिणः कं स्वाधिपतिं विधातुम् विचारितवन्तः?

(ii) यदा अभिषेकोत्सवः प्रारब्धः तदा कः तत्रागच्छत्?

(iii) राजपदे कीदृशः जनः एव प्रतिष्ठापयितव्यः ?

**II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** (2x2=4)

(i) सम्प्रति जनाः कीदृशाः भवन्ति ?

(ii) लोकतान्त्रिकदेशेषु देशस्य कीदृशी स्थितिः भवति?

(iii) उलूकस्याभिषेक-समाचारं श्रुत्वा वायसः किमवदत् ?

**III. यथानिर्देशं उत्तरत - (केवलं प्रश्नत्रयम्)** (1x3=3)

(i) 'काकः' पदस्य अर्थे अनुच्छेदे कः शब्दः आगतः?

(अ) वायसः (ब) नेतारः (स) उलूकः

(ii) 'एषः दिवान्धः उलूकः राजपदे' अत्र विशेषणपदं किम् ?

(अ) दिवान्धः (ब) राजपदे (स) उलूकः

(iii) 'नवीना' इति पदस्य विलोमपदं गद्यांशे किं प्रयुक्तम् ?

(अ) एकदा (ब)प्राचीना (स) पुरातनी

(iv) 'तदैव कश्चित् वायसः तत्रागच्छत्' अत्र क्रियापदं किम् ?

(अ) कश्चित् (ब) आगच्छत् (स) तत्रागच्छत्

IV. **अस्य अनुच्छेदस्य कृते उचितं शीर्षकं लिखत ।** (1)

## <u>खण्डः - ख (रचनात्मककार्यम् - 15 अङ्काः)</u>

**प्र.2 भवान् रायगढ़नगरस्थः आदर्शः । भवतः मित्रं सार्थकः नागपुरनगरे वसति। तं प्रति परीक्षायाम् सफलतायै वर्धापनपत्रं पूरयित्वा लिखत -** (1/2x10=5)

(i)..................

तिथिः ..................

प्रिय मित्र (ii)................

अत्र कुशलम् (iii)................ । अद्यैव तव परिणामः (iv).............. । तव सफलतां ज्ञात्वा मम मनसि (v)........... प्रसन्नता जाता । मम एषा प्रसन्नता (vi)............. जाता यदा अहम् तव नाम योग्यता-सूचौ(vii)............. । त्वया सप्त-शतानि अंकाः प्राप्ताः । त्वं निश्चित-रूपेण (viii).................. प्राप्स्यसि । त्वया परिवारस्य विद्यालयस्य च नाम उज्ज्वलीकृतम् । अस्याम् उज्ज्वलसफलतायाम् अहम् (ix).............. हार्दिकं वर्धापनम् यच्छामि उज्ज्वल-भविष्याय च कामये । मातृपितृचरणेषु प्रणामाः ।

तव अभिन्नहृदयं मित्रम्

(x).................

| |
|---|
| अपश्यम्, महती, आदर्शः, आगतः, तुभ्यम्, छात्रवृत्तिम्, अधिकतरा, तत्रास्तु, सार्थकः, रायगढ़नगरतः |

**प्र.3 मञ्जूषायाः प्रदत्तशब्दानां सहायतया चित्रं दृष्ट्वा पञ्चवाक्यानि संस्कृतभाषायाम् लिखत -** (1x5=5)



| |
|---|
| उपवनस्य, बालकाः, बालिकाः, शिक्षकेन, पुष्पाणि, अनेके वृक्षाः, पश्यन्ति, उपनेत्रम्, धारितः, एतत् चित्रम्, वार्तालापं कुरुतः, पादपाः, उत्पतन्ति, त्रोटयन्ति, प्रसन्नाः सन्ति, विहरन्ति, खगाः |

**अथवा**

**मञ्जूषायां प्रदत्तशब्दानां सहायतया "भारतीय संस्कृतिः" इति विषयम् अधिकृत्य पञ्चवाक्यानि संस्कृतेन लिखत ।**

| |
|---|
| अन्तःकरणस्य अलंकरणम्, संस्कृतिः संस्कारेण जायते, भारतीया संस्कृतिः, विश्वे सर्वोच्चस्थानं धारयति, ज्ञानवर्धिका, महापुरुषाणां ऋषीणाञ्च जीवनीशक्तिः, आत्मनः शोभा, जीवनमूल्यस्य रक्षणं, परोपकारिका |

**प्र.4 अधोलिखितानाम् वाक्यानाम् संस्कृतेन अनुवादं कुरुत । (केवलं प्रश्नपञ्चकम्)** (1x5=5)

(क) तुम दोनों रामायण पढते हो ।

(ख) राम मोहन के साथ बाजार गया था ।

(ग) मैं कल कार द्वारा नागपुर से आऊँगा ।

(घ) हमें सदा सत्य बोलना चाहिये ।

(ङ) नगर के चारों ओर नदी बहती है ।

(च) सभी छात्र पुस्तक पढ़ें ।

(छ) गुरु शिष्यों को ज्ञान देते हैं ।

## खण्डः - ग (अनुप्रयुक्तव्याकरणम् - 25 अङ्काः)

**प्र.5 अधोलिखितवाक्येषु रेखांकितपदानां समुचितं सन्धिं विच्छेदं वा कृत्वा लिखत - (केवलं प्रश्नचतुष्टयम्)** (1x4=4)

(i) एते पक्षिणो मानुषेषु नोपगच्छन्ति ।

(ii) मूढोऽयं सिकताभिः सेतुं निर्मातुं प्रयतते ।

(iii) तुण्डेनास्य खग+अधिपः।

(iv) प्रकृतिः समेषां प्राणिनां संरक्षणाय यतते ।

(v) सा खलु वाक्+भवति ।

**प्र.6 उचितैः शब्दरूपैः प्रदत्तविकल्पेभ्यः चित्वा अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - (केवलं प्रश्नचतुष्टयम्)** (1x4=4)

(i) अहम्...................नमामि ।

(अ) गुरुम् (ब) गुरोः (स) गुरवे

(ii) गुरुः ..................आशीर्वादं यच्छति ।

(अ) छात्रान् (ब) छात्राणाम् (स) छात्रेभ्यः

(iii) सः..................जलं आनयति ।

(अ) जलाशयेन (ब) जलाशयात् (स) जलाशयस्य

(iv) .....................बालकाः तरन्ति ।

(अ) नद्याम् (ब) नद्याः (स) नदीम्

(v) विद्या................पूज्यते नहि धनम् विद्याविहीनः पशुः ।

(अ) राजा (ब) राजभ्यः (स) राजसु

**प्र.7 उचितैः धातुरूपैः प्रदत्तविकल्पेभ्यः चित्वा अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - (केवलं प्रश्नचतुष्टयम्)** (1x4=4)

(i) गीता रमा च तत्र ......................|

(अ) पठथः (ब) पठतः (स) पठति

(ii) ह्यः शनिवासरः .........................|

(अ) भविष्यति (ब) आसन् (स) आसीत्

(iii) ते सर्वदा गुरुम् .......................|

(अ) सेवन्ते (ब) सेवते (स) सेवसे

(iv) शुभाः ते पन्थानः ..........................|

(अ) अस्तु (ब) अभवत् (स) सन्तु

(v) श्वः तौ चलचित्रं ......................|

(अ) द्रक्ष्यामः (ब) द्रक्ष्यतः (स) द्रक्ष्यथः

**प्र.8 अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः चित्वा उचितविभक्तिरूपेण वाक्यानि पूरयत - (केवलं प्रश्नचतुष्टयम्)** (1x4=4)

(i) भक्ताः कथयन्ति.................नमः ।

(अ) शारदां (ब) शारदाय (स) शारदायै

(ii) इदं...................अभितः वृक्षाः सन्ति ।

(अ) नगरम् (ब) नगरस्य (स) नगरात्

(iii) अलम् मिथ्या..........................|

(अ) भाषणस्य (ब) भाषणात् (स) भाषणेन

(iv) सा बालिका ...................निपुणा अस्ति |

(अ) कलायाम् (ब) कलाम् (स) कले

(v) ................... पुरतः राजमार्गः वर्तते |

(अ) उपवनम् (ब) उपवने (स) उपवनस्य

**प्र.9 प्रदत्तविकल्पेभ्यः चित्वा रेखांकितपदेषु प्रकृति-प्रत्ययौ संयोज्य विभज्य वा रिक्तस्थानानि पूरयत - (केवलं प्रश्नत्रयम्)** (1x3=3)

(i) उपाध्यायस्य मुखं <u>दृश्+तुमुन्</u> नैव इच्छामि ।

(अ) द्रष्टुम् (ब) दृष्ट्वा (स) दर्शनीयम्

(ii) अहम् बाल्ये विद्यां न <u>अधीतवान्</u> ।

(अ) अधि+इ+शतृ (ब) अधि+इ+क्त (स) अधि+इ+क्तवतु

(iii) न चापि <u>आ+दा+ल्यप्</u> कुशली वैदेहीं मे गमिष्यसि |

(अ) आदेय (ब) आधाय (स) आदाय

(iv) तेन पर्यावरणं <u>रक्षितम्</u> भविष्यति |

(अ) रक्ष्+क्त (ब) रक्ष्+शतृ (स) रक्ष्+ क्त्वा

प्र.10 संख्यावाचिरूपाणां उचितं रूपं प्रयुज्य रिक्तस्थानानि पूरयत -(केवलं प्रश्नत्रयम्) (1x3=3)

(i) संस्कृतभाषायां.......(3)..........वचनानि भवन्ति |

(ii) वृक्षे..........(17)..........वानराः तिष्ठन्ति |

(iii) अत्र..........(1)...........नदी वहति |

(iv) वेदाः.........(4)............ सन्ति |

प्र.11 अधोलिखितेषु पदेषु प्रयुक्तान् उपसर्गान् पृथक्कृत्वा लिखत - (केवलं प्रश्नत्रयम्) (1x3=3)

(i) पराजयः (ii) अधिरोहति (iii) उत्थानम् (iv) सुपुत्रः

## खण्ड: - घ (पठितावबोधनम् - 30 अङ्काः)

प्र.12 अधोलिखितम् गद्यांशम् पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

"प्रकृतिः समेषां प्राणिनां संरक्षणाय यतते । इयं सर्वान् पुष्णाति विविधैः प्रकारैः, तर्पयति च सुखसाधनैः | पृथिवी, जलं, तेजो, वायुः आकाशश्चास्याः प्रमुखानि तत्त्वानि | तान्येव मिलित्वा पृथक्तया वाऽस्माकं पर्यावरणं रचयन्ति | आव्रियते परितः समन्तात् लोकोऽनेनेति पर्यावरणम् | यथा अजातश्शिशुः मातृगर्भे सुरक्षितस्तिष्ठति तथैव मानवः पर्यावरणकुक्षौ | परिष्कृतं प्रदूषणरहितं च पर्यावरणमस्मभ्यं सांसारिकं जीवनसुखं, सद्विचारं, सत्य-संकल्पम् मांगलिकसामग्रीम् च प्रददाति | प्रकृतिकोपैः आतंकितो जनः किम् कर्तुम् प्रभवति? जलप्लावनैः, अग्निभयैः, भूकम्पैः, वात्याचक्रैः, उल्कापातादिभिश्च सन्तप्तस्य मानवस्य क्व मंगलम् ?"

I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) (1/2x2=1)

(i) प्रकृतिः समेषां प्राणिनां कस्मै यतते?

(ii) मानवः कुत्र सुरक्षितः?

(iii) प्रकृतिः कैः सर्वान् तर्पयति ?

II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) (1x2=2)

(i) प्रकृतेः प्रमुखानि तत्त्वानि कानि सन्ति?

(ii) पर्यावरणम् अस्मभ्यं किम् किम् प्रददाति ?

(iii) पर्यावरणस्य परिभाषा का ?

III. निर्देशानुसारं उत्तरत - (केवलं प्रश्नद्वयम्) (1x2=2)

(i) 'विनाशनाय' शब्दस्य विपरीतार्थकः शब्दः गद्यांशे कः प्रयुक्तः?

(ii) 'प्रददाति' इति क्रियायाः कर्तृपदं गद्यांशे किम् प्रयुक्तम् ?

(iii) 'प्रकृतिकोपैः आतंकितो जनः किम् कर्तुम् प्रभवति?' वाक्येऽस्मिन् विशेष्यपदं किम् ?

प्र.13 अधोलिखितम् पद्यांशम् पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

**"तस्य तीक्ष्णनखाभ्यां तु चरणाभ्यां महाबलः।**
**चकार बहुधा गात्रे व्रणान्पतगसत्तमः ॥"**

(I) एकपदेन उत्तरत -(केवलं प्रश्नद्वयम्) (1/2x2=1)

(i) अत्र कः पतगसत्तमः कथितः ?

(ii) श्लोके महाबलः कः आसीत् ?

(iii) पतगसत्तमः कान् चकार ?

**(II) पूर्णवाक्येन उत्तरत -(केवलं प्रश्नद्वयम्)** (1x2=2)

(i) जटायुः काभ्यां बहुधा व्रणान् चकार ?

(ii) जटायोः नखाः कीदृशाः आसन् ?

(iii) जटायुः व्रणान् कस्य गात्रे चकार ?

**(III) निर्देशानुसारं उत्तरत -(केवलं प्रश्नद्वयम्)** (1x2=2)

(i) 'चकार बहुधा गात्रे व्रणान्पतगसत्तमः' वाक्येऽस्मिन् क्रियापदं किम् ?

(ii) 'तीक्ष्णनखाभ्यां चरणाभ्यां' अनयोः पदयोः विशेष्यपदं किम् ?

(iii) अत्र श्लोके 'अकरोत्' इति पदस्य कः पर्यायः प्रयुक्तः ?

**प्र.14 अधोलिखितम् नाट्यांशम् पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -**

श्वेतकेतुः - कश्च प्राणः?

आरुणिः - पीतानाम् अपां योऽणिष्ठः स प्राणः।

श्वेतकेतुः - भगवन्! का इयं वाक्?

आरुणिः - वत्स! अशितस्य तेजसो योऽणिष्ठः सा वाक्। सौम्य ! मनः अन्नमयं, प्राणः आपोमयः, वाक् च तेजोमयी भवति इत्यप्यवधार्यम्।

श्वेतकेतुः - भगवन्! भूय: एव मां विज्ञापयतु।

आरुणिः - सौम्य ! सावधानं शृणु। मथ्यमानस्य दध्नः योऽणिमा,स ऊर्ध्वं समुदीषति, तत्सर्पिः भवति ।

श्वेतकेतुः - भगवन्! भवता घृतोत्पत्तिरहस्यम् व्याख्यातम्। भूयोऽपि श्रोतुमिच्छामि।

आरुणिः - एवमेव सौम्य ! अश्यमानस्य अन्नस्य योऽणिमा, स ऊर्ध्वं समुदीषति। तन्मनो भवति | अवगतं न वा?

श्वेतकेतुः - सम्यगवगतं भगवन् !

**(I) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** (1/2x2=1)

(i) मनः कीदृशं वर्तते ?

(ii) वाक् कीदृशी भवति ?

(iii) श्वेतकेतोः गुरुः कः आसीत् ?

**(II) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** (1x2=2)

(i) सर्पिः किम् भवति ?

(ii) मनः किम् भवति ?

(iii) प्राणः कः वर्तते ?

**(III) यथानिर्देशं उत्तरत - (केवलं प्रश्नद्वयम्)** (1x2=2)

(i) 'मथ्यमानस्य दध्नः' अत्र विशेष्यपदं किम् ?

(ii) अत्र 'पुनः' इत्यस्य कः पर्यायः आगतः ?

(iii) नाट्यांशे 'व्याख्यातम्' इति क्रियापदस्य कर्तृपदम् किम् ?

**प्र.15 रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नचतुष्टयम्)** (1x4=4)

(i) पुरुषः <u>सिकताभिः</u> एव सेतुं करिष्यसि |

(ii) स्वादूनि भक्ष्यकवलानि ते दास्यामि ।

(iii) प्रकृतिः जीवनसुखम् प्रददाति ।

(iv) खगाधिपः दश बाहून् व्यपाहरत् ।

(v) आरुणिम् उपगम्य श्वेतकेतुः अभिवादयति |

**प्र.16 निम्नलिखितश्लोकस्य अन्वयं मञ्जूषातः समुचितपदं चित्वा पूरयत -** (1x3=3)

| सेतुः, ज्ञानं, तपोभिः |
|---|

विना लिप्यक्षरज्ञानं तपोभिरेव केवलम् ।
यदि विद्या वशे स्युस्ते सेतुरेष तथा मम॥

**अन्वयः** - यदि विद्या लिप्यक्षर........(i)..........विना केवलं...........(ii).........एव ते वशे स्युः तथा एषः .........(iii)...........मम (स्यात्) ।

**अथवा**

**निम्नलिखितश्लोकं पठित्वा मञ्जूषायाः पदानि चित्वा भावार्थं पूरयत -**

"जटायुस्तमतिक्रम्य तुण्डेनास्य खगाधिपः ।
वामबाहून्दश तदा व्यपाहरदरिन्दमः ।।"

**भावार्थः** - क्रोधान्धरावणेन..........(i).............प्राणघातकं प्रहारं पश्चात्..........(ii)............जटायुः चञ्च्वा प्रहारं कृत्वा तस्य.............(iii)........अङ्गस्य दशबाहून् क्षत-विक्षतान् अकरोत् । शत्रुनाशक खगाधिपस्य पराक्रमः बुद्धिकौशलस्य इदं सुन्दरम् उदाहरणं अस्ति ॥

| वाम, पक्षिराजः, जटायोः |
|---|

**प्र.17 घटनाक्रमानुसारं अधोलिखितवाक्यानि क्रमेण संयोज्य पुनः लिखत -** (1/2x8=4)

(i) कुक्कुरः आह- स्वामिनो गृहे रक्षानियोगकरणान्न मया भ्रष्टव्यम् ।

(ii) एते पक्षिणो मानुषेषु नोपगच्छन्ति ।

(iii) मधुकरः द्विस्त्रिरस्याह्वानमेव न मानयामास ।

(iv) न कोऽपि अहमिव वृथा कालक्षेपं सहते ।

(v) अयि चटकपोत ! मानुषस्य मम मित्रं भविष्यसि ।

(vi) भ्रान्तः बालः चिन्तयामास - अहं पुनरात्मानं विनोदयिष्यामि ।

(vii) सः मधुकरं क्रीडाहेतोराह्वयत् ।

(viii) चटकपोतः स्वकर्मव्यग्रः बभूव ।

**प्र.18 अधोलिखितपदेषु पर्याय पदेन सह मेलनं कृत्वा लिखत -** (1x4=4)

| | | | |
|---|---|---|---|
| (i) | निदाघे | - | बाणधरः |
| (ii) | सर्पिः | - | ग्रीष्मे |
| (iii) | शरी | - | निन्दितः |
| (iv) | गर्हितः | - | घृतम् |